नाम छात्र / छात्रा: ______________________ अनुक्रमांक: ______________________

वार्षिक परीक्षा- मार्च 2025

कक्षा – 7

विषय - संस्कृतम्

समयावधि: 150 निमेषा: पूर्णांका:60

**सामान्यनिर्देशा: -**

- सर्वे प्रश्ना: अनिवार्या: सन्ति।
- प्रश्न संख्या अवश्यमेव लेखनीया।
- प्रश्नपत्रे पञ्च खण्डा: क, ख, ग, घ, ङ सन्ति।
- श्रेष्ठ अङ्कान् प्राप्तये सुस्पष्ट: लेख: लेखनीय:।

**भाग - क (बहुविकल्पीय प्रश्नानि)**

अधोलिखितानां प्रश्नानां बहुविकल्पा: सन्ति। तेषु उचितं विकल्पं चित्वा लिखत। 10×1=10

प्रश्न 1. आहरे व्यवहारे च क: सुखी भवेत् ?

(क) नर: (ख) त्यक्तलज्ज: (ग) मानव: (घ) विद्वान्

प्रश्न 2. आकाशमार्गेण क: अन्यत्र गन्तुम् इच्छति ?

(क) कूर्म: (ख) धीवर: (ग) मत्स्य: (घ) गोपालक:

प्रश्न 3. कस्य अष्ट कर्मकरा: सन्ति?

(क) नीलकण्ठे: (ख) शिवे : (ग) कृष्णमूर्ते (घ) नीलकण्ठस्य गृहे

प्रश्न 4. क: न प्रतीक्षते ?

(क) दिनम् (ख) मृत्यु: (ग) जन: (घ) समयं

प्रश्न 5. त्रिवर्ण: ध्वज: अस्माकं कस्य प्रतीक: अस्ति ?

(क) अहिंसाया: (ख) धर्मस्य (ग) सत्यस्य (घ) स्वाभिमानस्य

प्रश्न 6. चटका कुत्र प्रतिवसति स्म ?

(क) गृहे (ख) पर्वते (ग) नगरे (घ) वृक्षे

प्रश्न 7. शिवनिन्दां श्रुत्वा का क्रुद्धा जाता ?

(क) माता (ख) पार्वती (ग) पिता (घ) सखी

प्रश्न 8. गुरुणां गुरु: का अस्ति ?

(क) कान्ता (ख) माता (ग) विद्या (घ) पिता

प्रश्न 9. प्रकृति सर्वेषु केन व्यवहरति?

(क) असमत्वेन (ख) पूर्णत्वेन (ग) समत्वेन (घ) अपूर्णत्वेन

प्रश्न 10. शिक्षाया: मौलिक अधिकारस्य घोषणा कदा अभवत् ?

(क)2009 तमे वर्षे (ख) 2007 तमे वर्षे (ग) 2006 तमे वर्षे (घ) 2004 तमे वर्षे

**भाग-ख (वस्तुनिष्ठ प्रश्नानि)** 5×1=5

प्रश्न 11. लोके वशीकृति: का ?

प्रश्न 12. क: महारिपु: अस्माकं शरीरे तिष्ठति?

प्रश्न 13. शून्यस्य प्रतिपादनं क: अकरोत् ?

प्रश्न 14. भिन्न प्रकृतिकं पदं चिनुत-

व्याघ्र:, खादति, सिंह: ,भल्लूक: ।

प्रश्न 15. 'निकषा' इति पदस्य किम् अर्थ: ?

**भाग- ग (अति लघूत्तरात्मक प्रश्नानि)** **6 × 2 = 12**

अधोलिखितानां प्रश्नानां उत्तरम् दीयताम् ।

प्रश्न 16. (क) 'भवति' इत्यत्र क: लकार:?

(ख) 'पुस्तक' शब्दस्य द्वितीया विभक्ति: बहुवचन लिखत - ____________

प्रश्न 17. कच्छप: कुत्र गन्तुम् इच्छति ?

प्रश्न 18. विलोमपदानि योजयत-

अध: - नीचै:

अन्त: - उपरि:

उच्चै: - सुलभम्

दुर्लभम् - बहि:

प्रश्न 19. सन्धिकार्यं कुरुत –

(क) प्रदेश: + अस्ति = __________ ।

(ख) ___________ + __________ = देशोऽस्ति ।

प्रश्न 20. उदाहरणानुसारं पदरचनां कुरुत–

यथा - वसति स्म = अवसत्

पश्यति स्म = _________

वदति स्म = __________

प्रश्न 21. अङ्कानां कृते संस्कृत संख्या लिखत-

(क) 18 - ____________

(ख) 50 - ____________

**भाग- घ (लघूत्तरात्मक प्रश्नानि)** 6 × 3 = 18

प्रश्न 22. रेखाङ्कितपदानि अधिकृत्य प्रश्ननिर्माणं कुरुत-

(क) सत्येन वाति वायुः।

(ख) विद्या राजसु पूज्यते।

(ग) वसुन्धरा बहुरत्ना भवति।

प्रश्न 23. अधोलिखितानि अव्ययपदानि चित्वा रिक्तस्थानानि पूरयत-

**तथा , न, सदा ।**

(क) भक्तः ____________ ईश्वरं स्मरति।

(ख) असत्यं ____________ वक्तव्यम्।

(ग) प्रियं ____________ सत्यं वदेत्।

प्रश्न 24. निर्देशानुसारं उतरं लिखत ।

(क) 'अस्ति' अत्र कः धातुः?

(ख) 'द्रष्टुम् 'इति पदे कः प्रत्ययः?

(ग) भिन्न प्रकृतिकं पदं चिनुत-

गच्छति, पठति, अहसत्, धावति।

प्रश्न 25. अधोलिखितानि पदानि चित्वा रिक्तस्थानानि पूरयत-

द्वौ , षड् , द्वादश ।

(क) ____________ ऋतवः भवन्ति।

(ख) मासाः __________ भवन्ति।

(ग) मम शरीरे ________ हस्तौ स्तः ।

प्रश्न 26. निर्देशानुसारं उतरं लिखत ।

(क) 'पठति' अत्र कः धातुः?

(ख) 'हसित्वा ' इति पदे कः प्रत्ययः?

(ग) भिन्न प्रकृतिकं पदं चिनुत-

गच्छति, पठति, अहसत्, धावति।

प्रश्न 27. पदरचनां कुरुत—

वसति स्म = ____________

पश्यति स्म = ____________

वदति स्म = ____________

### भाग - ड (दीर्घोत्तरात्मक प्रश्नानि) 3 × 5 = 15

प्रश्न 28. पद्यांशस्य सप्रसंग हिंदीभाषायां व्याख्या लिखत् -

**सुख दुःखे समे कृत्वा लाभालाभौ जयाजयौ ।**
**ततो युद्धाय युज्यस्व नैवं पापमवाप्स्यसि ॥**

प्रश्न 29. गद्यांशस्य सप्रसंग हिंदीभाषायां व्याख्या लिखत्।

**अस्ति मगधदेशे फुल्लोत्पलनाम सरः। तत्र संकटविकटनामको हंसौ निवसतः। कम्बुग्रीवनामा तयोः मित्रम् एकः कूर्मः अपि तत्रैव प्रतिवसति स्म। अथ एकदा धीवराः तत्र आगच्छन् अकथयन् च"वयं श्वः मत्स्यकूर्मादीन् मारयिष्यामः।" एतत् श्रुत्वा कूर्मः अवदत्-"मित्रे ! किं युवाभ्यां धीवराणां वार्ता श्रुता ?**

प्रश्न 30. अधोलिखितम् गद्यांशं पठित्वा प्रदतप्रश्नानाम् उत्तराणि लिखत-

**भारतस्य उत्तरस्यां दिशि हिमालयः पर्वतः अस्ति। सः भारतस्य मुकुटमणिः इव शोभते। सः शत्रुभ्यः अस्मान् रक्षति। अस्य दक्षिणपूर्व-दिशयोः समुद्रौ स्तः। सागरः भारतमातुः चरणौ प्रक्षालयति इव। अस्माकं देशे अनेके पर्वताः सन्ति। अत्र अनेकाः नद्यः प्रवहन्ति। नद्यः पानाय जलं यच्छन्ति। ताः नद्यः देशे शस्यम् अपि सिञ्चन्ति। एवं ताः अस्माकम् उदरपूरणीय अन्नं जलं च यच्छन्ति।**

(i) उपर्युक्त गद्यांशस्य उचितं शीर्षकं लिखत?
(ii) हिमालयः केभ्यः अस्मान् रक्षति?
(iii) देशे शस्य काः सिञ्चन्ति?
(iv) हिमालयः भारतस्य कस्यां दिशि वर्तते?
(v) भारतस्य मुकुटमणिः इव कः शोभते?